अष्टानां [1]दशताम् अशीभावः तिः प्रत्ययश्च । अष्टौ दशतः [2]परिमाणमस्य अशीतिः । नवानां [3]दशतां नवभावः तिः प्रत्ययश्च । नव दशतः परिमाणमस्य नवतिः । दशानां [4]दशतां शभावः तश्च प्रत्ययः । दश दशतः परिमाणमस्य [5]सङ्घस्य शतम् ।

विंशत्यादयो[6] गुणशब्दाः, ते यथाकथंचिद् [7]व्युत्पाद्याः । [8]नात्रावयवार्थेऽभिनिवेष्टव्यम् । तथाहि – पङ्क्तिः इति [9]क्रमसंनिवेशेऽपि वर्तते, [10]ब्राह्मणपङ्क्तिः, पिपीलिकापङ्क्तिः इति । न चात्रावयवार्थः कश्चिदस्ति । या चैषां विषयभेदेन गुणमात्रे गुणिनि च वृत्तिः, स्वलिङ्गसङ्ख्यानुविधानं च, [11]एतदपि सर्वं स्वाभाविकमेव । सहस्रादयोऽप्येवंजातीयकाः तद्वदेव द्रष्टव्याः । उदाहरणमात्रमेतदिति ॥

## पञ्चद्दशतौ वर्गे वा । (६०/१७२६)

पञ्चत् दशत् इत्येतौ[12] निपात्येते तदस्य परिमाणम् इत्यस्मिन् [13]विषये वर्गेऽभिधेये । सङ्ख्यायाः (५.१.५८/१७२४) इति कनि प्राप्ते [14]डतिर्निपात्यते । वावचनात् पक्षे सोऽपि भवति । पञ्च परिमाणस्य पञ्चद्[15]वर्गः । [16]दशद्वर्गः । पञ्चको वर्गः । दशको वर्गः ॥

## सप्तनोऽञ् छन्दसि । (६१/३४९१)

[17]वर्गे इत्येव, तदस्य परिमाणम् इति च । सप्तन् शब्दाच् छन्दसि [18]विषये[19]ऽञ् प्रत्ययो भवति वर्गेऽभिधेये । [20]सप्त साप्तानि (तै. सं. ५.४.७.५) असृजत् ॥

## त्रिंशच्चत्वारिंशतोर्ब्राह्मणे सञ्ज्ञायां डण् । (६२/१७२७)

तदस्य परिमाणम् [21]इत्येव । वर्गे इति निवृत्तम् । त्रिंशच्चत्वारिंशच्छब्दाभ्यां सञ्ज्ञायां [22]विषये डण् प्रत्ययो भवति तदस्य परिमाणम् इत्येतस्मिन् [23]विषये ब्राह्मणेऽभिधेये । [24]अभिधेयसप्तमी एषा, [25]न विषयसप्तमी । तेन मन्त्रभाषयोरपि भवति । त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि ब्राह्मणानि । चात्वारिंशानि ब्राह्मणानि । कानिचिदेव ब्राह्मणान्युच्यन्ते ॥

## तदर्हति । (६३/१७२८)

तत् इति द्वितीयासमर्थाद् अर्हति इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । श्वेतच्छत्रमर्हति श्वैतछत्रिकः । वास्त्रयुग्मिकः (५.१.१८/१६८१)[26] । शत्यः, शतिकः (५.१.२१/१६८६) । साहस्रः (५.१.२७/१६९२) ॥

---

1. दशताम् नास्ति क. फ. 2. परिमाणमस्य नास्ति फ. 3. दशताम् नास्ति क. 4. दशताम् नास्ति फ. 5. सङ्घस्य नास्ति क. फ. ह. 6. च शब्दाः इत्यधिकम् फ. 7. व्युत्पाद्यन्ते क. 8. अवयवार्थे नास्ति क. 9. क्रमसंनिवेशः क. 10. बह्मपङ्क्तिः क. 11. तदपि ह. 12. शब्दौ इत्यधिकम् क. फ. ह. 13. अर्थे ह. 14. डतिः नास्ति क. 15. वर्गस्य क. 16. दशत्परिमाणमस्य इत्यधिकम् क. 17. सर्गे ह. 18. अर्थे फ. 19. अण् ह. 20. साप्त सामान्यसृजन् ह. साप्तानि असृजत् क. 21. इति वर्तते ब. क. फ. 22. विषये नास्ति फ. 23. अर्थे क. 24. अभिधेये सप्तमी क. 25. न विषय – भवति नास्ति क. फ. ह. 26. वास्त्रिकः प्रास्तिकः इत्यधिकम् क.